दित्यः एति प्रत्यहमुदयं करोति अग्रे प्रथमं मर्त्यस्य मनुष्यस्य सतस्तस्य पुरुषमेधयाजिनः आजानं देवत्वं मुख्यं देवत्वम् सूर्य्यरूपेण। द्विविधा देवाः कर्मदेवा आजानदेवाश्च कर्म्मणोत्कृष्टेन देवत्वं प्राप्ताः कर्म्म देवाः सृष्ट्यादावुत्पन्ना आजानदेवाः ते कर्म्मदेवेभ्यः श्रेष्ठाः “ये शतं कर्म्मदेवानामानन्दाः स एक आजानदेवानामानन्द इति श्रुतेः” वेददी० जननसाधने २प्रकृतौ च। “न हस्तिनं प्रतिगृह्णीयात् पुरुषाजानोहि हस्तीति” शत० भा० पुरुषाजानः पुरुषप्रकृतिकः” इति भा०। आ+जन घञ् दीर्घः” ३उत्पत्तौ पु०।

**आजानज** त्रि० आजानं जायते। सृष्टिकालादरभ्यजाते देवादौ। द्विविधा हि देवाः केचित् कर्म्मदेवाः केचिदाजानदेवाश्च यथ “ते ये शतमाजनजानां देवानामानन्दाः स एकः ये कर्म्मणा देवानपियन्ति” ऐत०उ०।

**आजानदेव** पु० आजानं सृष्टिकालमारभ्य देवः देवत्वमाप्तः। कर्म्मणानुत्पन्नदेवभावे चिरप्रसिद्धे देवे “अथ ये शतं कर्म्म देवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ते शतमाजानदेवानामानन्दाः” वृ०उ०। “आजानदेवानामेक आनन्दः उत्पत्तितएव ये देवास्ते आजानदेवाः” भा०।

**आजानि** त्रि० आ+जन–अन्तर्भूतण्यर्थे इण् छन्दसीति दीर्घः। १जनके जननकर्त्तरि। “त्रीण्यायूंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने!” ऋ०३,१७,३। आजानीः जनयित्रीर्मातरः” भा०। अन्तर्भूतण्यर्थाभावे। २अनुजाते च “तत्रैव पक्षान्तरे आजनयः अनुजाताः स्वसार इति भाष्यकृता व्याख्यातम्।

**आजानिक्य** न० आजानौ भवः ठन् तस्य भावादौ पुरो० यक्। आजन्मसिद्धपदार्थस्य भावे कर्मणि च।

**आजानेय** पु० आजे विक्षेपेऽपि आनेयोऽश्ववाहो यथा स्थानमस्य। “शक्तिभिर्भिन्नहृदयाः स्खलन्तश्च पदेपदे। आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः” इत्युक्तलक्षणे उत्तमाश्वे। [ स्य ब्रह्मणोवाऽपत्ये।

**आजायन** पुंस्त्री अजस्यापत्यम् नडा० फक्। अजनामकन्टप-

**आजि** स्त्री अजन्त्यस्याम् अज–इण् न वीभवः। १समरभूमौ २संग्रामे, “आजिं न जग्मुर्गिर्वाहो अश्वाः” ऋ०६,२४,६, “ते यावन्तएवाजौ तावान् स ददृशे परैः” रघुः। “अस्माकमिन्द्र! दुष्टरं पुरोयाचालमाजिषु” ऋ०५,२५,७ “आजिषु संग्रामेषु” भा०। ३मर्य्यादायां स्त्री वा ङीप्। “अतोयान्यानि वीर्य्यवन्ति कर्म्माणि यथाग्नेर्मन्थनम् आजेः सरणम् दृढस्य धनुष आयमनम्” छा०उ० “आजेः मर्य्यादायाः सरणं धावनम्” शङ्करभा० ५क्षणे ६मार्गे पु०। “धन्वना गां धन्वनाजिं जयेम” यजु०२९,३९। “धन्वना आजिं मार्गं जयेम अजन्ति गच्छन्ति यस्मिन्नसावाजिर्मार्गः” वेददी०। भावे इण् ७आक्षेपे।

**आजिनीय** त्रि० अजिन+चतुरर्थ्यां कृशाश्वा० छण्। चर्म्मसन्निकृष्टदेशादौ। [ सन्निकृष्टदेशादौ।

**आजिरि** त्रि० अजिर+चतुरर्थ्यां सुतङ्गमा० इञ्। अङ्गन-

**आजिरेय** त्रि० अजिर+शुभ्रादि० ढक्। अङ्गनभवादौ।

**आजिहीर्षा** स्त्री आहर्त्तुमिच्छा आ–हृ सन्–भावे अ। आहरणेच्छायाम्। उ। आजिहीर्षुः। आहरणेच्छौ त्रि०।

**आजीकूण** न० आजीं कूणति आप्नोति यस्मिन् आ+कूण–आधारे क। मर्य्यादावरके देशभेदे ततः धूमादि०भवादौ पथ्यादौ वुञ्। आजीकूणिकः। आजीकूणदेशभवे–पथि अध्याये, न्याये, विहारे, मनुष्ये, हस्तिनि, गोमये च।

**आजीगर्त्ति** पुंस्त्री० अजीगर्त्तस्यापत्यम् बाह्वा०इञ्। अजीगर्त्तस्यापत्ये।

**आजीव** पु० आजीव्यतेऽनेन आ+जीव–करणे घञ्। १आजीवनोपाये द्रव्यादौ २उपाये च। अन्नाशनमुपक्रम्य “तस्मिन् काले स्थापयेत्तत्पुरस्तात् वस्त्रं शस्त्रं पुस्तकं लेखनीञ्च। स्वर्णं रौप्यं यच्च गृह्णाति बालस्तैराजीवैस्तस्य वृत्तिः प्रदिष्टा” मु०चि०। नृणां जन्मलग्नावधि दशमभावे मेषादीनां क्षेत्रहोराद्रेक्काणनवांशद्वादशांशत्रिंशांशरूपैः षड्भिर्वर्गैः क्रमेणाजीवोपायविशेषज्ञानं भवति यथोक्तं जातके “अथ कल्याणवर्म्मोक्तां दशमेंऽशविभेदजाम्। वृत्तिचिन्तां लिखेत्कर्म्माजीवोक्तामपि चिन्तयेत्। “वाटिकाकृषिबणिग्नृपसेवादुत्यतोऽजगणतः स्वभे भवेत्। जीवनं वृषगणाच्चतुष्पदैः पक्षिधान्यशकटादिसंग्रहैः। मौक्तिकादिजलजैर्लिपिलेख्यैर्विद्रुमादिकबणिक्क्रियादिभिः। द्वन्द्वभागत अथो कुलीरतोनीरजैर्विषभगाग्निशस्त्रजैः। वनाद्रिकाष्ठसन्नाहकुप्याकुप्यैश्च धान्यकैः। कृषिपाषाणबाणिज्यैर्वृत्तिः सिंहांशतः स्वभे। गान्धर्वशिल्पशकटैर्मणिहेमकर्म्म गन्धक्रयैर्नभसि षट्कगणैश्च लेख्यैः। हेमाम्बुगोमहिषधान्यकृषिक्रयैश्च मूलैर्धनैर्नृपतितोऽपि तुलोत्थवर्गे। स्त्रीसङ्गमाप्तधनचौर्य्यचिकित्सितैश्च निन्द्योद्यमैर्नृपतिसेवनतोऽलिवर्गे। भैषज्यरूपगणितादिकयन्त्रविद्याभूपालमन्त्रिगिरिदुर्गवशाद्धनुःस्थे।